# .. vAmanastotram ..

## ॥ वामनस्तोत्रम् ॥

अव्याद्वो वामनो यस्य कौस्तुभप्रतिबिम्बिता ।
कौतुकालोकिनी जाता जाठरीव जगत्त्रयी ॥ १॥
अङ्घ्रिदण्डो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे ।
विधिविष्टरपद्मस्य नालदण्दो मुदेऽस्तु वः॥ २॥
खर्वग्रन्थिविमुक्तसन्धविलसद्वक्षः
स्फुरत्कौस्तुभं निर्यन्नाभिसरोजकुड्मलपुटीगम्भीरसामधवनि ।
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं
पायाद्वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः ॥ ३॥
स्वामी सम्भुवनत्रस्य विकृतिं नितोऽसि किं याञ्चया
यद्वा विश्वसृजा त्वयैव न कृतं तद्दीयतां ते कुतः ।
दानं श्रेस्ष्ठतमाय तुभ्यमतुलं बन्धाय नो मुक्तये
विज्ञप्तो बलिना निरुत्तरतया ह्रितो हरिः पातुः वः ॥ ४॥
ब्रह्माण्डच्चत्रदण्डः शतधृतिभवनाम्भोरुहो
नालदण्डः क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चक्राक्षिदण्डस्त्रिभुवनविजयस्तम्भदण्डोङ्घ्रिदण्डः
क्षेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥ ५॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study
and research. The file is not to be copied or reposted for promotion
of any website or individuals or commercial purpose without permission.



From http://sanskritdocuments.org